শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

ৱিল্লূর্ নডাদূর্ শ্রী শ্রীনিধেঃ কৃতিষু

# ॥ সুন্দরবাহুদশকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ সুন্দরবাহুদশকম্ ॥

করিতাজিতকল্লোলিকন্যকাকান্তরক্ষসে।
করুণাদিগুণাঢ্যায কমলানিধযে নমঃ॥

লক্ষ্মীমুগ্ধনিরাসপর্বত ইতি প্রারোচমীষৎস্বনঃ
লক্ষ্মীমুগ্ধ উপেত্য তূর্ণমবিশৎ পূর্ণং মদীযং মনঃ।
লক্ষ্মীমুগ্ধহৃদো মমাপি যদি চেৎসেযং দশা কা পুনঃ
লক্ষ্মীমুগ্ধপদাব্জমুগ্ধমনসঃ কারেরপত্যস্য নঃ॥ **1** ॥

বনে ভবাখ্যে পরিতোঽবিরামং
ভযঙ্করে হন্ত ! সদা ভ্রমন্তম্।
বনাদ্রিবাসিন্নতিসুন্দরাঙ্গ !
ত্বদঙ্ঘ্রিপদ্মৈকরতিং বিধেযাঃ॥ **2** ॥

বনে বনে সন্তি ধরাধরেন্দ্রাঃ
বনানি ভূযাংসি চ তেষু তেষু।
বনাদ্রিনামা পুনরেষ শৈলঃ
বনং চ বৃক্ষাশ্চ গিরির্ভবান্ যৎ॥ **3** ॥

সৌন্দর্যমাধুর্যমযীমযে ! ত্বং
মূর্তিং সমাধায গিরাবমুষ্মিন্।
উদ্যানসৌন্দর্যযুতে বিহারং
গঙ্গাম্বুমাধুর্যযুতে বিধৎসে॥ **4** ॥

শ্রীচাপপুর্যাং মম তাতপাদৈঃ
সন্দর্শিতং তে ভগবন্ ! গিরীন্দ্রম্।

আসেৱ্য নিত্যং পুলকাঙ্কিতোঽহম্
অত্যন্তমানন্দনিধির্ভৱামি ॥ **5** ॥

ধনুষ্পুরেঽস্মিন্ বহুমানভূমা
মমান্তরেৱং ৱনশৈলনাথ !।
গিরিস্ত্ৱদীযো নযনদ্ৱযং যৎ
আনন্দযত্যত্র সতো জনস্য ॥ **6** ॥

গিরীশোঽযং সত্যং তৱ গিরিরসৌ সুন্দরহরে !
ভৱন্মূর্তিং হৃদ্যাং ভজতি নিজপার্শ্ৱেন নিযতম্।
ৱহত্যেনাং গঙ্গাং নিজশিরসি লীনামৃতকরঃ
মহানার্যামোদং কলযতি সদা যৎস্ৱৱপুষা ॥ **7** ॥

জ্যোতির্জ্যোতিরিতি শ্রুতির্ৱদতি যৎ ব্রহ্মাহমেৱাস্মি তজ্ -
জ্যোতির্মূর্তিরনেকধাৱগমনঃ সৌন্দর্যসারাকৃতিঃ।
অত্যন্তোন্নতৱিস্তৃতাতিনিৱিডচ্ছাযৈর্দ্রুমৈরাৱৃতে
শৈলেঽস্মিন্নিতি ৱক্তি মঙ্গলনিধিঃ শ্রীমান্ ৱনাদ্রীশ্ৱরঃ ॥ **8** ॥

ৱৃষভভূধররত্নৱিভূষণং
ৱৃষভৱাহধনুঃ পরিভঞ্জনাৎ।
ৱৃষভমর্দনতশ্চ ৱৃতাঙ্গনং
ৱৃষভমেকমহং শরণং ভজে ॥ **9** ॥

নূপুরগঙ্গাসলিলাসক্তেঃ
নূপুরনাদে লক্ষ্ম্যাস্সরতেঃ।
নূপুরদৃষ্টৈর্নন্দিতসৌরেঃ
নূপুররম্যং পাদমুপাসে ॥ **10** ॥

সুন্দরবাহোর্দশকং
সুন্দরৱল্লীসুতেন মানিধিনা।

সুন্দরমেতদ্রচিতং
সুন্দরসম্পৎসমূহদং পঠতাম্॥ **11**॥

॥ ইতি সুন্দরবাহুদশকং সমাপ্তম্॥